दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णचतुर्थी
बैशाख 22 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-192 | 1 | मई 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 HPBOSE 12th Result - द्वादश-कक्षायां कन्याः अग्रिण्यः, 'उत्कृष्ट-१०' श्रेष्ठता-सूच्यां १२१ मेधाविषु ९९ छात्राः

3 शास्त्री-भर्ती-विवादः 'बैच-वाइज' नियुक्तौ विसङ्गतिश्च; परिषदा उत्थापितः स्वरः

5 पश्चिमबंगालराज्ये बीजेपीदलस्य विजयसमीक्षा (निर्वाचनविशेषः)

# बंगप्रदेशे प्रथमबारं भाजपापक्षस्य सर्वकारः,

## "केरले यूनाइटेड डेमोक्रेटिक फ्रंट दलेन द्व्यधिकशतं (102) आसनानि जितानि।"

| पश्चिम बंगाल | | असम | | तमिलनाडु | | केरल | | पुडुचेरी | |
|---|---|---|---|---|---|---|---|---|---|
| भाजपा+ | 208 | भाजपा+ | 102 | टीवीके | 107 | यूडीएफ | 99 | भाजपा+ | 18 |
| टीएमसी | 79 | कांग्रेस+ | 21 | डीएमके+ | 74 | एलडीएफ | 35 | कांग्रेस+ | 06 |
| कांग्रेस | 02 | एआईयूडीएफ | 02 | एआईडीएमके+ | 53 | भाजपा+ | 03 | टीवीके | 03 |
| अन्य | 04 | अन्य | 01 | अन्य | 00 | अन्य | 03 | अन्य | 03 |
| (बहुमत 148) | | (बहुमत 64) | | (बहुमत 118) | | (बहुमत 71) | | (बहुमत 16) | |

हिमसंस्कृतवार्ता। भारतीयजनतापार्टी पञ्चसु राज्येषु अभूतपूर्वं प्रदर्शनं कुर्वती 3-2 इति अन्तरेण विजयं स्वायत्तीकृतवती। पार्टी यत्र असम-पुडुचेरी राज्ययोः स्वसर्वकारं रक्षितुं सफला अभवत्, तत्रैव पश्चिमबङ्गाले ममता-बनर्जीं पराजित्य प्रथमवारं राज्यस्य सत्तां प्राप्तवती। लगातारं त्रिवारं बङ्गालस्य मुख्यमन्त्रिणी भूता ममता ईदृशस्य महतः पराजयस्य अपेक्षां कदापि न कृतवती स्यात्, यस्याः दलः 100 आसनानां संख्यामपि प्राप्तुं न शक्तः।

### ममतायाः पराजयः आरोपश्च

भवानीपुर-क्षेत्रात् ममता बनर्जी स्वयं सुभेंदु-अधिकारिणा 15,114 मतैः पराजिता। सा मतगणना-केन्द्रे प्रायः पञ्चहोराः यावत् अतिष्ठत्। बहिरागत्य सा आरोपं कृतवती यत् "अन्तः अहं बलात् नुत्ता ताडिता च।" ममता उक्तवती यत् भाजपायाः इयं विजयः न अपितु लूटनम् अस्ति। निर्वाचनआयोगेन केन्द्रीयबलैः, प्रधानमन्त्रिणा, गृहमन्त्रिणा च सह मिलित्वा यत् किमपि कृतं तत् पूर्णतया अवैधम् अस्ति। अत्र पुनर्गणना भवेत्।
समाचारलेखनपर्यन्तं भाजपा 200 तः अधिकानि आसनानि जित्वा स्पष्टबहुमतं प्राप्तवती आसीत्। राज्ये कांग्रेस-पक्षेण द्वे आसने अवश्यं प्राप्ते, किन्तु पक्षस्य प्रदेशाध्यक्षः अधीररञ्जनचौधरी स्वयं पराजितः।

### निर्वाचनविवरणम्

विदितं अस्तु यत् सोमवासरे राज्यस्य 294 विधानसभा-आसनेषु आहत्य 293 आसनेषु मतगणना प्रचलिता, यतः भारतीय-निर्वाचनआयोगेन (ECI) शनिवासरे दक्षिण-24-परगना जनपदस्य फाल्टा-विधानसभा-आसने 21 मई दिनाङ्के पुनर्मतदानस्य घोषणा कृता आसीत्, यस्य परिणामः 24 मई दिनाङ्के घोषयिष्यते।

### तमिलनाडु-राज्ये परिवर्तनम्

अन्यतः, एकं बृहत् परिवर्तनं तमिलनाडु-राज्ये अपि अभवत्, यत्र वर्षद्वयपूर्वं गढितः अभिनेतुः विजयस्य पक्षः टी.वी.के. (TVK) प्रथमस्थाने आगतः। टी.वी.के. 107 आसनैः सह सर्वतः अग्रे अस्ति। तमिलनाडु-राज्यस्य वर्तमानमुख्यमन्त्री एम.के. स्टालिनः कोलाथुर-क्षेत्रात् पराजितः। तं टी.वी.के. पक्षस्य बी.एस. बाबुना 8,000 तः अधिकैः मतैः पराजितम्।
अत्र टी.वी.के. पक्षाय सर्वकारं निर्मातुं 118 आसनैः सह बहुमतं प्राप्तव्यं भविष्यति। अभिनेतुः विजयस्य पिता चन्द्रशेखरः उक्तवान् यत् विजयः कांग्रेसेन सह गठबन्धनं कर्तुं शक्नोति। डी.एम.के. पक्षेण सह मिलित्वा युध्यमानाय कांग्रेस-पक्षाय पञ्च आसनानि प्राप्तानि।

### असम-पुडुचेरी-केरल राज्यानां स्थितिः

असमराज्यम्: असमराज्ये अपि हिमन्त-सर्वकारस्य पुनरागमनं जातम्। हिमन्तः लगातारं तृतीयवारं सर्वकारं निर्मास्यति। भाजपा-गठबन्धनेन असमे 102 आसनानि जितानि, अन्यतः कांग्रेस-गठबन्धनं केवलं 21 आसनेषु सीमितम् अभवत्। कांग्रेसस्य मुख्यचेहरा गौरव गोगोई स्वयं अपि पराजितः।
**पुडुचेरी-:** पुडुचेरी-विधानसभा-निर्वाचनस्य परिणामेषु सत्तारूढ-एन.आर. कांग्रेस-नेतृत्वे एन.डी.ए. (NDA) गठबन्धनेन स्पष्टबहुमतं प्राप्तम्। भाजपा-अन्नाद्रमुक समर्थितेन अनेन गठबन्धनेन केन्द्रशासितप्रदेशे स्वसत्ता रक्षिता। अत्र एन.डी.ए. गठबन्धनं 18 आसनानि प्राप्तवान्। अभिनेतुः विजयस्य टी.वी.के. नेतृत्वे अपि अत्र त्रीण्णि आसनानि जितानि। इदं निश्चितं प्रायं यत् एन. रंगासामी एव आगामि-मुख्यमन्त्री भविष्यति।
**केरलराज्यम्-:** केरलराज्ये कांग्रेस-नेतृत्वे यू.डी.एफ. (UDF) पक्षेण 99 आसनानि जित्वा बहुमतं प्राप्तम्। अत्र वामदलानां गठबन्धनस्य (LDF) हस्तात् सत्ता निर्गता। पिनाराई विजयनः मुख्यमन्त्रीपदात् त्यागपत्रं दत्तवान्, यद्यपि सः धरमदम-क्षेत्रे विजयी अभवत्। सः कांग्रेस-प्रत्याशिनं अब्दुल रशीदं 19,000 मतैः पराजितवान्।
भाजपायाः वरिष्ठनेता प्रधानमन्त्री नरेन्द्रमोदी च उक्तवान् यत् अद्यतनदिनम् ऐतिहासिकम् अभूतपूर्वञ्च अस्ति। सः पश्चिमबङ्गाल-असम-पुडुचेरी-तमिलनाडु-केरलराज्यानां जनतां प्रति दलीयकर्मकर्तॄन् प्रति च आभारं प्रकटितवान्।

### अद्यतनदिनं देशस्य कृते नूतन-प्रभातस्य प्रतीकम् अस्ति-प्रधानमन्त्री

देहल्यां भाजपा-मुख्यालये कार्यकर्तॄन् सम्बोधयन् श्रीमोदी अवदत् यत् अद्यतनदिनं देशस्य कृते नूतनप्रभातस्य प्रतीकम् अस्ति, जनता च भारतस्य विशाललोकतन्त्रे, प्रदर्शनस्य राजनीतौ (performance politics) तथा 'एकं भारतं श्रेष्ठं भारतम्' इति भावनायां स्वविश्वासं प्रकटितवती अस्ति।
सः हर्षं व्यक्तवान् यत् जनतायाः विश्वासेन 'कमलम्' पुनः विकसितम्। सः दलीयकर्मकर्तॄणां मार्गदर्शनाय भाजपा-अध्यक्षस्य नितिन-नवीनस्य प्रशंसां कृतवान्। सः उक्तवान् यत् जय-पराजयौ लोकतन्त्रे राजनीतौ च भवतः एव, अस्मिन् वारे तु विश्वेन दृष्टं यत् भारतं 'लोकतन्त्रस्य जननी' इति किमर्थं कथ्यते। सः अवदत् यत् अद्यतनदिनं भारतस्य लोकतन्त्रस्य भारतीयसंविधानस्य च विजयस्य दिनम् अस्ति।

## सुभाषितम्

**न कालो दण्डमुद्यम्य,**
**शिरः कृन्तति कस्यचित्।**
**कालस्य बलमेतावत्,**
**विपरीतार्थदर्शनम्।।**

भावार्थ- काल किसी व्यक्ति को यदि सजा देता है तो किसी दण्ड से न दे कर केवल उसकी बुद्धि भ्रष्ट कर देता है। उसकी शक्ति इसी में निहित है कि वह उस व्यक्ति के विवेक को ही नष्ट कर देता है। फलस्वरूप वह हर बात का विपरीत अर्थ निकाल कर नष्ट हो जाता है।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्



प्रधानमन्त्रिणा मोदीमहोदयेन उक्तं यत् देशस्य विंशतिभ्यः अधिकेषु राज्येषु भाजपा-एनडीए (NDA) सर्वकाराः सत्तायां सन्ति, भाजपायाः मन्त्रश्च अस्ति - "नागरिकः एव ईश्वरः"। सः अवदत् यत् पक्षः जनतायाः सेवायै समर्पितः अस्ति, अत एव जनता भाजपा-पक्षे अधिकाधिकं विश्वासं प्रकटयति। सः अस्मिन् विषये बलं दत्तवान् यत् जनता स्पष्टरूपेण पश्यति यत् यत्र भाजपा अस्ति, तत्र सुशासनं विकासश्च वर्तते।

# HPBOSE 12th Result - द्वादश-कक्षायां कन्याः अग्रिण्यः, 'उत्कृष्ट-१०' श्रेष्ठता-सूच्यां १२१ मेधाविषु ९९ छात्राः

| RANK | | MARKS | (%) AGE |
|---|---|---|---|
| 1 |  | 495 | 99% |
| | | Kangra | |
| 2 |  | 493 | 98.6% |
| | | Una | |
| 2 |  | 493 | 98.6% |
| | | Hamirpur | |

| | MARKS | (%) AGE |
|---|---|---|
|  | 491 | 98.2% |
| | Una | |
|  | 491 | 98.2% |
| | Una | |
|  | 491 | 98.2% |
| | Kangra | |

| RANK | | MARKS | (%) AGE |
|---|---|---|---|
| 1 |  | 496 | 99.2% |
| | | Kangra | |
| 2 |  | 495 | 99% |
| | | Sirmour | |
| 3 |  | 494 | 98.8% |
| | | Kangra | |

चित्रे क्रमशः विज्ञानसंकायस्य वाणिज्यसंकायस्य कलासंकायस्य प्रथमद्वितीयतृतीयप्रतिभागिनां चित्राणि सन्ति

**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेश-विद्यालयीय- शिक्षामण्डलेन सोमवासरे द्वादशकक्षयायाः वार्षिक- परीक्षापरिणामः घोषितः। कोरोना-कालं विहाय प्रथमवारं परीक्षापरिणामः ९२.०२ प्रतिशतं जातः, यः गतवर्षस्य अपेक्षया ८.८६ प्रतिशतं अधिकः अस्ति। कला-सङ्काये (Arts) काङ्गड़ा-जनपदस्य 'पीएमश्री' राजकीय- वरिष्ठ- माध्यमिक- विद्यालय- भवारना इत्यस्य अंशितकुमारेण ५०० अङ्केषु ४९६ (९९.२%) अङ्कान् प्राप्य प्रथमं स्थानं लब्धम्। अंशितः सम्पूर्ण-श्रेष्ठता-सूच्यान् अपि शीर्षस्थाने अस्ति।

विज्ञान-सङ्काये काङ्गड़ा-जनपदस्य 'दि न्यू इरा स्कूल ऑफ साइंस' छतड़ी इत्यस्य शायला कश्यप ५०० अङ्केषु ४९५ (९९%) अङ्कान् प्राप्य प्रथमं स्थानं प्राप्नोत्। तथैव, वाणिज्य-सङ्काये ऊना-जनपदस्य 'एसटी डी. आर. पब्लिक स्कूल' गगरेट इत्यस्य यशस्वनी चौहान, अस्यैव विद्यालयस्य कृषिका, काङ्गड़ा-जनपदस्य 'एवीएम' वरिष्ठ- माध्यमिक- विद्यालय-पाहड़ा इत्यस्य अयानः ५०० अङ्केषु ४९१ (९८.२%) अङ्कान् प्राप्य संयुक्त-रूपेण प्रथमस्थानं प्राप्तवन्तः।

## श्रेष्ठता-सूच्याम् आहत्य १२१ विद्यार्थिनः-

त्रयाणां सङ्कायानां श्रेष्ठता-सूच्यां आहत्य १२१ विद्यार्थिनः स्थानं प्राप्तवन्तः। एतेषु ९९ छात्राः, २२ च छात्राः स्थानं प्राप्तुं सफलाः अभवन्। श्रेष्ठता- सूच्यां ६१ राजकीय-विद्यालयानां ६० च निजी- विद्यालयानां आधिपत्यं वर्तते। 'ओवरऑल शीर्ष दश' सूच्यां आहत्य ७६ विद्यार्थिनः सन्ति, येषु ६० बालिकाः १४ च बालकाः सम्मिलिताः। एतेषु ४२ विद्यार्थिनः राजकीय-विद्यालयानां, ३४ च निजी- विद्यालयानां सन्ति।

## कला-सङ्कायः (Arts)

कलासङ्काये सिरमौर-जनपदस्य राजकीय- वरिष्ठ-माध्यमिक- विद्यालय- कङ्गेर- धारयार इत्यस्य आरुषी ५०० अङ्केषु ४९५ (९९%) अङ्कैः द्वितीयं, काङ्गड़ा-जनपदस्यैव राजकीय- आदर्श- वरिष्ठ- माध्यमिक-दाड़ी इत्यस्य शाम्या बड़जात्या ५०० अङ्केषु ४९४ (९८.८%) अङ्कैः तृतीयं स्थानं प्राप्तवती।

## वाणिज्य-सङ्कायः (Commerce)

वाणिज्य-सङ्काये काङ्गड़ा-जनपदस्य राजकीय- कन्या-वरिष्ठ- माध्यमिक- विद्यालय नगरोटा बगवां इत्यस्य अञ्जली च मुस्कान तथा सोलन-जनपदस्य शिवालिक-साइंस- सीनियर- सेकेंडरी- स्कूल- खुरानी इत्यस्य जाहनवी ५०० अङ्केषु ४८९ (९७.८%) अङ्कान् प्राप्य संयुक्त-रूपेण द्वितीयं स्थानं, ऊना-जनपदस्य 'पीएमश्री' राजकीय- आदर्श- विद्यालयः धुन्धला इत्यस्य मुस्कान, काङ्गड़ा-जनपदस्य राजकीय- वरिष्ठ- माध्यमिक-विद्यालय मलाहरी इत्यस्य रिधिमा ५०० अङ्केषु ४८८ (९७.६%) अङ्कान् प्राप्य संयुक्तरूपेण तृतीयं स्थानं प्राप्तवत्यः।

## विज्ञान-सङ्कायः (Science)

विज्ञान-सङ्काये ऊना-जनपदस्य गुरुकुल- पब्लिक-स्कूल- पक्कापरोह अम्ब इत्यस्य सञ्चिता धीमान तथा हमीरपुरस्य आर्यन- पब्लिक- स्कूल- झांदी इत्यस्य काशीशर्मा ५०० अङ्केषु ४९३ (९८.६%) अङ्कैः संयुक्तरूपेण द्वितीयं स्थानं, सोलनस्य सनराइज-पब्लिक-स्कूल-बरूणा इत्यस्य तमन्नाशर्मा, काङ्गड़ा-एवीएम- स्कूल- पाहड़ा इत्यस्य नितिनः, ऊना-जनपदस्य एसडी- पब्लिक- स्कूल- सन्तोषगढ़ इत्यस्य वैशाली ठाकुर च ५०० अङ्केषु ४९२ (९८.४%) अङ्कैः संयुक्तरूपेण तृतीयं स्थानं प्राप्तवन्तः।

## ७४,६३७ अभ्यर्थिनः उत्तीर्णाः

विद्यालयीय-शिक्षा-मण्डलस्य अध्यक्षेण डॉ. राजेशशर्मणा उक्तं यत् द्वादश-कक्षायां आहत्य ८१,४१७ अभ्यर्थिनः पञ्जीकृताः आसन्, येषु ७४,६३७ उत्तीर्णाः अभवन्। ३,३५२ अभ्यर्थिनां परिणामः 'अनुत्तीर्णः' (Fail), ३,०७१ अभ्यर्थिनां च परिणामः 'कम्पार्टमेण्ट' (Compartment) इति जातः।

## पुनर्निरीक्षणाय पुनर्मूल्याङ्कनाय च १९ मई पर्यन्तं आवेदनं कुर्वन्तु

शिक्षा-मण्डलस्य सचिवेन डॉ. मेजर विशालशर्मणा उक्तं यत् उत्तरपुस्तिकानां पुनर्मूल्याङ्कनाय पुनर्निरीक्षणाय च अभ्यर्थिनः १९ मई दिनाङ्कपर्यन्तं आवेदनं कर्तुं शक्नुवन्ति। अस्मिन् अन्तराले पुनर्मूल्याङ्कनाय प्रतिविषयं १००० रूप्यकाणि, पुनर्निरीक्षणाय च ८०० रूप्यकाणि शुल्कं दातव्यं भविष्यति। पुनर्मूल्याङ्कनार्थं सम्बद्धविषये २० प्रतिशतम् अङ्कानां प्राप्तिः अनिवार्या अस्ति।

# द्वादश-कक्षायाः परिणामे राजकीय-विद्यालयानां वर्चस्वम्, शिक्षा-मन्त्री अवदत्- 'शिक्षण-गुणवत्तायां परिष्कारस्य प्रतिफलम्'

**हिमसंस्कृतवार्ताः - शिमला।** शिक्षा-मन्त्रिणा रोहित-ठाकुरेण हिमाचलप्रदेश-विद्यालयीय-शिक्षा-मण्डलेन घोषित-द्वादश-कक्षायाः परीक्षापरिणामेषु उत्कृष्ट-प्रदर्शनं कृतवद्भ्यः राज्यस्य सर्वेभ्यः छात्रेभ्यः वर्धापनानि दत्तानि। तेन उक्तं यत् अस्यां परीक्षायां आहत्य ८१,४१७ विद्यार्थिनः सम्मिलिताः आसन्, येषु ७४,६३७ विद्यार्थिनः सफलाः अभवन्, येन कुल-उत्तीर्ण-प्रतिशतं ९२.०२ प्रतिशतं जातम्। सः अवदत् यत् एषः परिणामः गतवर्षाणां तुलनायां श्रेष्ठः अस्ति। एतत् राज्यसर्वकारेण शिक्षा-मण्डलेन च शिक्षा-क्षेत्रे कृतानां निरन्तर-परिष्काराणां प्रयासानां च सकारात्मकं परिणामं दर्शयति। शिक्षा-मन्त्री हर्षं प्रकटयन् अवदत् यत् श्रेष्ठता-सूच्यां (Merit List) सर्वाधिकं विद्यार्थिनः राजकीय-विद्यालयेभ्यः सन्ति, यत् राजकीय-शिक्षण-संस्थानेषु प्रदेश-सर्वकारेण क्रियमाणस्य गुणवत्ता-परिष्कारस्य परिणामः अस्ति।



# शास्त्री-भर्ती-विवादः 'बैच-वाइज' नियुक्तौ विसङ्गतिश्च; परिषदा उत्थापितः स्वरः




## शिक्षायाः गुणवत्तायाः पारम्परिक-संस्कृतस्य च अस्तित्वस्य सङ्कटः।

शिमला। हिमाचल-राजकीय-संस्कृत-शिक्षक-परिषदा प्रदेशसर्वकारेण सद्यः कृतायाः 'शास्त्री' इति पदस्य 'बैच-वाइज' नियुक्तेः विवादे स्वपक्षः उपस्थापितः। परिषद् स्पष्टतया मन्यते यत् अनेन न केवलं सहस्रशः पात्र-शास्त्री-अभ्यर्थिभिः सह अन्यायः भवति, अपितु देवभाषायाः संस्कृतस्य शैक्षणिकस्तरेण गुणवत्तया च सह अपि उपहासः क्रियते।

वृत्तिहीनः-युवानः अपि अधिकारिणः प्रति टिप्पणीं न कुर्युः, तदा एव संवादेन समाधानं सम्भवति। परिषदा बेरोजगार-शास्त्री-सङ्घः, संस्कृत-संस्कृति-संरक्षण-मञ्चः, संस्कृत-महाविद्यालय-आचार्य-सङ्घश्च अस्मिन् विषये एकत्र आगन्तुम् आहूताः। सर्वकाराय अपि विनम्रमार्गप्रार्थना अस्ति यत् अस्य उचितसमाधानाय एका समितिः रचनीया।

## शास्त्री विरुद्धं सामान्य-बी.ए. (B.A.)-: गुणवत्तया सह विरोधः

परिषदा दृढशब्दैः उक्तं यत् 'शास्त्री' इति उपाधिः एका विशिष्टा (Specialized) उपाधिः अस्ति, यस्यां छात्रः पारम्परिकशास्त्राणां विंशतिभ्यः अधिकपत्राणां गहनमध्ययनं करोति। अस्य विपरीतम्, बी.ए. (B.A.) मध्ये केवलम् एकं विषयं संस्कृतं पठितवन्तः अभ्यर्थिनः शास्त्री-पदाय पात्राः इति स्वीकारः विषयस्य गुणवत्तायाः ह्रासः अस्ति। परिषदा तर्कः दत्तः यत् यदि बी.ए. मध्ये गणितं पठित्वा छात्रः 'TGT (Non-Medical)' भवितुं न शक्नोति, तर्हि एकविषयमात्रपाठकः 'शास्त्री' पदस्य पात्रः कथं भवितुं शक्नोति?

### पारम्परिक-संस्कृत-संस्थानां राजभाषायाः च अपमानः

हिमाचलसर्वकारेण संस्कृतं द्वितीय-राजभाषायाः गौरवः प्रदत्तः, किन्तु वास्तविकता भिन्ना अस्ति। प्रदेशे नव राजकीय-संस्कृत-महाविद्यालयाः अन्ये च अनेकाः संस्थाः सन्ति यत्र सहस्रशः छात्राः पारम्परिकशिक्षां गृह्णन्ति। यदि विभागः सामान्यस्नातकं (बी.ए.) एव प्राथमिकतां दास्यति, तर्हि एतेषां महाविद्यालयानां अस्तित्वं सङ्कटापन्नं भविष्यति छात्राश्च पारम्परिकशिक्षातः विमुखाः भविष्यन्ति।

### बी.एड. (B.Ed.) अनिवार्यता बैच-निर्धारणञ्च

परिषद् कथयति यत् ये शास्त्री-अभ्यर्थिनः वर्षेभ्यः स्वप्रतीक्षां कुर्वन्तः आसन्, तान् बी.एड. बैच-आधारेण बहिः निष्कासनं नैसर्गिकन्यायस्य विरुद्धम् अस्ति। पूर्वं शास्त्रीपदाय बी.एड. अनिवार्यता न आसीत्। अतः पुरातनाभ्यर्थिनां कृते शास्त्री-उपाधेः बैच-समयः एव आधारः भवेत्। अपि च हिमाचलप्रदेशविश्वविद्यालये शास्त्री-उपाधिधारिणां कृते बी.एड. मध्ये विशिष्टकोटा-अभावः अपि महती विसङ्गतिः अस्ति।

## मुख्याः अभ्यर्थनाः

१. **आर एण्ड पी (R&P) नियमाः-:** २७ अगस्त २०१२ दिनाङ्कस्य पुरातन-नियमान् यथावत् स्थापयित्वा केवलं तत्र बी.एड. अनिवार्यतां योजयितुं NCTE संस्थायाः कृते निर्देशाः दीयन्ताम्।

२. **पदनाम-:** 'TGT संस्कृत' इत्यस्य स्थाने 'TGT शास्त्री' इति पदनाम स्वीकृतं भवेत्।

३. पात्रताः केवलं पारम्परिक-शास्त्री-उपाधिधारिणः एव अस्मिन् पदे अर्हाः (Eligible) मन्यन्ताम्।

४. **बैच-आधारः-:** बैच-वाइज नियुक्तौ शास्त्री-बैचः एव आधारः भवेत्, न तु बी.एड. बैचः।

५. **बी.एड. कोटा-:** हिमाचलप्रदेशविश्वविद्यालये पत्राचारविभागे (ICDEOL) च शास्त्रीधारिणां कृते बी.एड. पाठ्यक्रमे विशिष्टाः आसन्दाः (Seats) प्रदीयेरन्।

## "प्रसार-भारती-संस्थायाः नवनियुक्तः अध्यक्षः प्रसून-जोशी सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन सह मेलनं कृतवान्"



भारतस्य सार्वजनिक-सेवा-प्रसारकस्य प्रसार-भारती-संस्थायाः नवनियुक्तः अध्यक्षः प्रसून-जोशी अद्य नवदेहल्यां सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन सह मेलनं कृतवान्। सः गतसप्ताहे प्रसार-भारती-संस्थायाः अध्यक्षपदे नियुक्तः जातः। श्रीजोशी साहित्य-विज्ञापन-चलच्चित्र-सार्वजनिक-सञ्चार-क्षेत्रेषु व्यापकं योगदानं दातुं प्रतिष्ठितः अस्ति। इतः पूर्वं श्रीजोशी मुम्बई-नगरे केन्द्रीय-चलच्चित्र-प्रमाणन-मण्डलस्य अध्यक्षः अपि आसीत्।

## नवदेहली: केन्द्रीयमन्त्री मनोहरलालः 'पारगमन-उन्मुख-विकास-नीतेः' समीक्षां कृतवान्



केन्द्रीय-आवासन-शहरीकार्य-मन्त्री मनोहरलालः नवदेहल्यां 'पारगमन-उन्मुख-विकास-नीतेः' (Transit Oriented Development Policy) समीक्षां कृतवान्। सः अस्याः नीतेः प्रभावी-कार्यान्वयनं सुनिश्चितं कर्तुं सभायाः अध्यक्षताम् अपि अकरोत्। इयं नीतिः ईदृशी एका अवधारणा अस्ति, या सार्वजनिक-परिवहनं, पदयात्राम्, उत्तोलिका-चालनं (साइकिल-चालनम्) च सुलभं कुर्वती विकास-योजनां निर्मातुं केन्द्रीभूता अस्ति। श्री मनोहरलालः सामाजिक-माध्यमे (Social Media) एकस्मिन् सन्देशे अस्य जानकारीं दत्तवान्। सः अवदत् यत् सभायां शहरी-विकासं व्यवस्थितं कर्तुं, स्थायित्वं प्रदातुं तथा सार्वजनिक-परिवहनं सुगमं कर्तुं च अस्याः नीतेः महत्वपूर्ण-भूमिकायाः उपरि व्यापका चर्चा अभवत्।

### विदेशसचिवः विक्रम-मिसरी महोदयः जपान-देशस्य 'लिबरल डेमोक्रेटिक पार्टी' इति दलस्य नीति-अनुसन्धान-परिषदः अध्यक्षेण ताकायुकु कोबायाशी महोदयेन सह मेलनं कृतवान्



विदेशसचिवः विक्रम-मिसरी महोदयः देहल्यां जपान-देशस्य 'लिबरल डेमोक्रेटिक पार्टी' इति दलस्य नीति-अनुसन्धान-परिषदः अध्यक्षेण ताकायुकु कोबायाशी महोदयेन सह मेलनं कृतवान्। विदेशमन्त्रालयेन विज्ञापितं यत् उभयपक्षौ भारत-जपान-सम्बन्धानां रणनीतिकमहत्त्वस्य पुष्टिं कृतवन्तौ, तथा च साझा-हितस्य क्षेत्रेषु द्विपक्षीयसम्बन्धन् अग्रे वर्धयितुं सहमतिं प्रकटितवन्तौ।

## विश्वस्य बृहत्तमं 'रियल-टाइम' भुगतान-मञ्चरूपेण उद्भूतं यूपीआई (UPI)

UPI
UNIFIED PAYMENTS INTERFACE

यूनिफाइड पेमेंट्स इण्टरफेस (यूपीआई) विश्वस्य बृहत्तमं 'रियल-टाइम' भुगतान-मञ्चरूपेण (तत्काल-भुगतान-मञ्चरूपेण) उद्भूतम् अस्ति। अप्रैल-मासे यूपीआई-माध्यमेन 22 अब्ज 35 कोटि (22.35 billion) व्यवहाराः (लेनदेन) कृताः। 11 अप्रैल, 2016 दिनाङ्के आरब्धम् इदं तन्त्रं स्वप्रारम्भात् एकदशकपश्चात् विश्वस्य बृहत्तमा भुगतान-प्रणालीरूपेण परिवर्तितं जातम्। यूपीआई वैश्विकस्तरे तत्काल-भुगतान-व्यवहाराणां प्रायः अर्धभागं पूरयति। इयं प्रणाली भारते भुगतानस्य पद्धतिं पुनः परिभाषितवती अस्ति।

यूपीआई अधुना भारतस्य अङ्कीय-अर्थव्यवस्थायाः (Digital Economy) आधारस्तम्भः (मेरुदण्डः) जातः अस्ति। इदं वित्तीय-समावेशनं प्रवर्धयति, निर्बाध-वाणिज्यिक-गतिविधीन् सरलीकरोति तथा च अङ्कीय-सार्वजनिक-अवसंरचनायां (DPI) वैश्विक-मानकं प्रदाति।

# मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत्- 'ईवीएम' (EVM) यन्त्रं कोऽपि कुत्रापि 'हैक' कर्तुं शक्नोति



**हिमसंस्कृतवार्ताः- शिमला।** पश्चिमबङ्गाल- सहित-अन्यराज्यानां विधानसभा- निर्वाचनपरिणामानन्तरं मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना महत् वक्तव्यं दत्तम्। मुख्यमन्त्रिणा विश्वासः कृतः यत् 'ईवीएम' (EVM) यन्त्रं कोऽपि कुत्रापि यन्त्र-तन्त्रेण नियन्त्रणम् ('हैक') कर्तुं शक्नोति। २०१४ तमे वर्षे लोकसभा-निर्वाचने हिमाचलप्रदेशे या मतदान-प्रतिशतता आसीत्, तस्मिन् काले अपि तेन प्रश्नाः उत्थापिताः। काङ्ग्रेस-पक्षाय केवलं २० प्रतिशतं मतानि प्राप्तानि। अनेन शङ्का उत्पद्यते। सोमवासरे सचिवालय- परिसरे माध्यमैः सह सम्भाषणकाले मुख्यमन्त्रिणा भाजपा-पक्षस्य उपरि 'ईडी' (ED) तथा 'सीबीआई' इत्येतासां अन्वेषण-संस्थानां कार्यकर्तारूपेण प्रयोगस्य आरोपः कृतः।

## २०१४ तमात् वर्षात् परं देशे राजनैतिकं परिवर्तनम् आगतम्- सुक्खुः

तेन उक्तं यत् २०१४ तमात् वर्षात् परं देशे राजनैतिकं परिवर्तनम् आगतम्। पूर्वं लोकतन्त्रे कस्यापि संस्थायाः उपरि प्रभावं न क्रियते स्म, किन्तु भाजपा-पक्षेण 'ईडी' तथा 'सीबीआई' स्वकार्यकर्तृत्वेन प्रयुक्ते। भाजपा निर्वाचने 'साम- दाम- दण्ड- भेद' इत्येतेषां सर्वेषां प्रयोगं करोति, यत् काङ्ग्रेस-पक्षेण कदापि न कृतम्। मुख्यमन्त्रिणा उक्तं यत् पश्चिमबङ्गाले काङ्ग्रेस-पक्षेण विंशति- वर्षानन्तरं स्वप्रत्याशिनः सर्वेषु आसनेषु अवतारिताः। सः स्वयं तत्र प्रचाराय गतः आसीत्, तत्र 'टीएमसी' विरुद्धं जनानां मध्ये महान् रोषः आसीत्। भविष्ये तत्र निश्चितरूपेण काङ्ग्रेस-शासनं भविष्यति। तेन उक्तं यत् भाजपा-पक्षेण तत्र ध्रुवीकरणं कृतं तथा च टीएमसी-पक्षस्य १५ वर्षाणां 'एण्टी-इनकम्बेन्सी' (सत्ता-विरोधि-लहर) इत्यस्य लाभः प्राप्तः।

## भाजपा-कार्यकर्तृभ्यः १५०० रूप्यकाणि दातुं न शक्नुमः

काङ्ग्रेस-सर्वकारस्य १० निर्वाचन-प्रतिश्रुतीनां विषये भाजपायाः प्रश्नानां प्रत्युत्तरं ददत् मुख्यमन्त्री अवदत् यत् सर्वकारेण १० प्रतिश्रुतयः पूरिताः, महिलाभ्यः १५०० रूप्यकाणि प्रदीयन्ते। अधुना सर्वकारस्य सार्ध-एकवर्षस्य कालः अवशिष्टः अस्ति, अन्येषु जनपदेषु अपि एषा राशिः दास्यते। व्यङ्ग्यं कुर्वन् सः अवदत् यत् "अधुना भाजपा- कार्यकर्तॄणां विधायकानां च पत्नीभ्यः १५०० रूप्यकाणि दातुं न शक्नुमः। एतत् तु केवलं सामान्यजनेभ्यः एव लप्स्यते।"

## निगम-निर्वाचने 'सिलिण्डर' मूल्यवृद्धिः विषयः भविष्यति

मुख्यमन्त्रिणा 'कमर्शियल-गैस-सिलिण्डर' मूल्यवृद्धये भाजपा आक्षिप्ता। सः अवदत् यत् नगर- निगम-निर्वाचने एषः विषयः मुख्यः भविष्यति। मूल्यवृद्धेः सर्वाधिकः प्रभावः नगरीयक्षेत्रेषु भविष्यति। ग्रामीणक्षेत्रेषु तु जनाः चुल्ल्यां भोजनं कुर्वन्ति। अतः नगर- निगम-निर्वाचने जनाः स्मरिष्यन्ति यत् कथं केन्द्रसर्वकारः महार्घतां (महँगाई) गगनं प्रापयति। एतदतिरिच्य 'आरडीजी' स्थगनस्य विषयः अपि निर्वाचने उत्थापयिष्यते।

## निर्वाचन-आयोगः निष्पक्षतया सह सहमतिं कृतवान् संस्थानम् अस्ति - विक्रमादित्यसिंहः

पञ्चराज्यानां निर्वाचनपरिणामेषु प्रतिक्रियाम् यच्छन् लोकनिर्माण-मन्त्री विक्रमादित्यसिंहः अवदत् यत् देशस्य निर्वाचन-आयोगः निष्पक्षतया सह सहमतिं कृतवान् संस्थानम् जातः। 'ईवीएम-हैक' सदृशाः घटनाः कुत्रापि निश्चितं जाताः सन्ति। बहूनि प्रमाणानि अपि प्राप्तानि। सम्पूर्णः देशः निर्वाचन- आयोगस्य निष्पक्षतायाः उपरि प्रश्नान् उत्थापयति। केन्द्रसर्वकारेण एतत् सर्वं कारितम्। मुख्य- निर्वाचन- आयुक्तस्य चयन-समित्याः मुख्य- न्यायाधीशं निष्कास्य गृह-मन्त्रिणः सम्मिलनं शङ्कास्पदम् अस्ति।

## आचारसंहिता-समाप्त्यनन्तरं पेन्शनर-जनानां 'जेसीसी' भविष्यति

मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना उक्तं यत् नगरीय-निकाय- पञ्चायतीराज- संस्थानां निर्वाचनस्य आचारसंहितायाः समाप्त्यनन्तरं 'पेन्शनर- संयुक्त-परामर्श- समित्याः' उपवेशनं भविष्यति। सोमवासरे 'हिमाचलप्रदेश पेन्शनर्स जॉइन्ट फ्रण्ट' इत्यस्य प्रतिनिधिमण्डलेन सह मेलनकाले तेन एतत् आश्वासनं दत्तम्। प्रतिनिधिमण्डलेन स्वयाचनाः मुख्यमन्त्रिणः सम्मुखं स्थापिताः। मुख्यमन्त्रिणा उक्तं यत् सर्वकारेण १.३६ लक्षं कर्मचारिणां कृते पुरातन-पेन्शन-योजना (OPS) पुनर्स्थापिता कृता, यद्यपि केन्द्रसर्वकारेण १६०० कोटि-रूप्यकाणां वित्तीय-साहाय्यं निरुद्धम्। अस्मिन् अवसरे पञ्चायतीराज-मन्त्री अनिरुद्धसिंहः, प्रधान-परामर्शदाता नरेशचौहानः च उपस्थिताः आसन्।

# राजधान्याः शिमलायाः विद्यालयान् विस्फोटक-यन्त्रेण (बम) नाशयितुं भर्त्सना, कोलाहलः व्याप्तः, सुरक्षा-संस्थाः सतर्कतायाम्

**हिमसंस्कृतवार्ताः - शिमला।**
प्रदेशस्य राजधान्यां शिमलायां सोमवासरे नगरस्य अनेक-विद्यालयेभ्यः सह नगर-निगम-कार्यालयं जाखू-रोपवे-मार्गं च 'बम' इत्यनेन विस्फोटयितुं भर्त्सना प्राप्ता। विद्यालयानां नाशनस्य भर्त्सनायाः कारणेन सर्वत्र कोलाहलः अभवत्। 'ई-मेल' (E-mail) माध्यमेन प्राप्तायाः भर्त्सनायाः अनन्तरं विद्यालय-प्रबन्धनेन सावधानीपूर्वकं अभिभावकेभ्यः सन्देशाः प्रेषिताः, बालकान् च तत्कालं गृहं नेतुं सूचितम्। एनं सन्देशं दृष्ट्वा अभिभावकेषु भयं व्याप्तम्। परिजनैः त्वरितमेव विद्यालयं प्राप्य स्वबालकाः गृहीताः। विषयस्य ज्ञानं प्राप्यैव आरक्षकाः (Police) सुरक्षा-संस्थाः च सक्रियाः अभवन्। शिमला-आरक्षकाधीक्षकेन (SSP) गौरव-महोदयेन उक्तं यत् एषा साधारणी-भर्त्सना ('जनरल थ्रेट') अस्ति। आरक्षकाः अन्वेषणे रताः सन्ति। एषा भर्त्सना नगर-निगम-कार्यालयस्य, जाखू-रोपवे-मार्गस्य तथा चैल्सी, दयानन्द, सेण्ट थॉमस, डीएवी-प्रभृति-अनेकेषां विद्यालयानां कृते प्राप्ता अस्ति। भर्त्सनायाः वार्तां श्रुत्वा अन्य-विद्यालयानां अभिभावकाः अपि भीताः अभवन्। येषु विद्यालयेषु भर्त्सना प्राप्ता, तत्र आरक्षकैः सन्दिग्ध-वस्तूनां अन्वेषणं कृतं, किन्तु किमपि विस्फोटक-यन्त्रं न प्राप्तम्। अधुना शिमला-आरक्षकाः एतत् ज्ञातुं प्रयतन्ते यत् इयं भर्त्सना केन दत्ता। उल्लेखनीयं यत् पूर्वमपि प्रदेशे एतादृशाः भर्त्सनाः प्राप्ताः सन्ति, यथा- उच्च-न्यायालयः, राज्य-सचिवालयः, जनपद-न्यायालयाः च।

आरक्षकाधीक्षकः (SSP) गौरवसिंहः अवदत् यत् शिमला-क्षेत्रस्य विविध-विद्यालयेभ्यः ई-मेल-माध्यमेन 'बम' सम्बद्धाः भर्त्सनाः प्राप्ताः इति विषयः संज्ञानम् आगतः। अधुना यावत् एषा सूचना साधारणी अस्ति, न तु कस्यचित् विशिष्ट-विद्यालयस्य कृते। प्राप्त-सूचनाः गम्भीरतया स्वीकृत्य मण्डल-आरक्षकैः मानक-सुरक्षा-प्रोटोकॉल-अनुसारं त्वरित-कार्यवाही क्रियते। प्रभावित-विद्यालय-परिसरेषु आरक्षक-दलैः व्यापकम् अन्वेषणं कृतम् अस्ति। प्रत्येकस्य स्थलस्य विधिवत् निरीक्षणं सत्यापनं च प्रचलति। सम्भावितं संकटं दृष्ट्वा आवश्यकाः उपचाराः स्वीकृताः, येषु परिसरस्य सुरक्षा-व्यवस्थायाः सुदृढीकरणं तथा विद्यालय-प्रबन्धनेन सह समन्वयः सम्मिलितः अस्ति। वर्तमाने कस्यापि अप्रिय-घटनायाः पुष्टिः न जाता। स्थितिः पूर्णतया नियन्त्रणे अस्ति। नागरिकेभ्यः अभिभावकेभ्यः च प्रार्थना अस्ति यत् ते प्रवादेषु (अफवाहों पर) ध्यानं न यच्छन्तु, शान्तिं रक्षन्तु तथा सतर्कताम् आवहन्तु।

# ।।गुरूणां कथा।। {बोधकथा}

## "भासमानः कमण्डलुः"

श्रीरामकृष्णपरमहंसः प्रतिदिनं स्वस्य कमण्डलुं संसक्तेन भस्मना मृत्तिकया च घर्षयित्वा प्रकाशमानं करोति स्म।

प्रतिदिनं कृतेन परिश्रमेण कमण्डलुः प्रकाशमानः दृश्यते स्म। रामकृष्णस्य शिष्यः प्रतिदिनं एतादृशं श्रमं, कमण्डलोः घर्षणं च दृष्ट्वा विचित्रम् अनुभवति। संशयस्य निवारणं कर्तुं तेन रामकृष्णः पृष्टः- भवतः कमण्डलुः भासमानः एव दृश्यते, कमण्डलौ वयं चित्रम् अपि द्रष्टुम् शक्यते तर्हि किमर्थं प्रतिदिनं कमण्डलुं भस्मना, मृत्तिकया घर्षयति? किं प्रतिदिनं एतादृशः श्रमः आवश्यकः?

गुरुः श्रीरामकृष्णपरमहंसः मन्दं मन्दं हसित्वा अवदत्– पुत्र! कमण्डलोः भासमानता केवलं एकस्मिन् दिने परिश्रमं कृत्वा न प्राप्ता। कमण्डलोः उपरि यत् किट्टम् [मलम्] अस्ति, तस्य अपाकरणाय प्रतिदिनं श्रमः आवश्यकः। एवमेव जीवने असमीचीनं तत्त्वम् अपि अस्ति, असमीचीनं संस्कारम् अपाकर्तुम् अस्माभिः प्रतिदिनं संकल्पपूर्णः परिश्रमः कर्तुम् आवश्यकः। मलस्य अपामार्जनम् आवश्यकम् खलु। कमण्डलु स्यात् अथवा व्यक्तेः जीवनम्। असमीचीनान् मलान् अपाकर्तुं प्रतिदिनं कठोरः परिश्रमः अत्यावश्यकः। यथा अयं कमण्डलुः प्रकाशते तथैव व्यक्तेः जीवनम् अपि कान्तिमत् भविष्यति। प्रस्तुतकथा अस्मान् किं बोधयति?

[१] प्रत्येकं जनेन स्वस्य असमीचीनं मलम् अपाकर्तुं सदैव प्रयासः करणीयः।

[२] तुच्छं कार्यमपि मनोयोगेन यदि क्रियते तर्हि तत्रापि वैशिष्ट्यपूर्णां भासमानताम् उत्पाद्य आकर्षणं निर्मितुं शक्यते।

सामान्यं कर्म अपि असामान्यत्वं प्राप्यते यदा एकाग्रतया मनोयोगेन च किञ्चित् कार्यं क्रियते।

**'अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरुवे नमः'**

**डॉ. वर्षा प्रकाश टोणगांवकरपुणे / महाराष्ट्रम्**

# पश्चिमबंगालराज्ये बीजेपीदलस्य विजयसमीक्षा (निर्वाचनविशेषः)

डॉ विमलेश झा ,बरारी ,भागलपुर , बिहारम्।

भारतीयराजनीतिक्षेत्रे भारतीयजनतापार्टीति दलस्य उत्कर्षः सर्वत्र दृश्यते। विशेषतया पश्चिमबंगालराज्ये 2026वर्षस्य विधानसभानिर्वाचने भारतीयजनता पार्टीदलस्य अभूतपूर्वः विजयः सम्पूर्णदेशस्य ध्यानम् आकर्षितवान्। एषः ऐतिहासिको वर्तते।दीर्घकालपर्यन्तं ममताबनर्जीत्यस्याः नेतृत्वे तृणमूलकांग्रेसदलस्य प्रभावः बंगप्रदेशे आसीत्, किन्तु अस्मिन् निर्वाचने जनमतस्य परिवर्तनं स्पष्टतया दृष्टम्। विविधकारणैः, योजनाभिः, जनसमर्थनेन, रणनीतिभिः च बीजेपीदलस्य विजयः सम्भूतः।

पश्चिमबंगालराज्यस्य राजनीतिः भारतस्य राजनीतौ विशिष्टं महत्वपूर्णं स्थानं वहति। एषः प्रदेशः दीर्घकालं यावत् वामपन्थीयशासनस्य केन्द्रम् आसीत्। ततः अनन्तरं तृणमूलकाङ्ग्रेसदलं सत्तां प्राप्तवान्। परन्तु बीजेपीदलस्य हार्दिकी इच्छा आसीत्, यत् अस्मिन् राज्ये अपि तस्य सर्वकारः भवेत् । एतस्य कृते अनेन दलेन प्रयासः कृतः। एतस्मात् कारणात् 2019 वर्षस्य लोकसभानिर्वाचनात् आरभ्य बीजेपीदलस्य प्रभावः बंगालराज्ये शनैः शनैः वर्धितः। 2026 वर्षस्य विधानसभानिर्वाचने तु सः प्रभावः विजयस्वरूपे परिणतः जातः। एषः विजयः केवलं राजनीतिकपरिवर्तनं न, अपितु सामाजिक-आर्थिक-मानसिक-परिवर्तनस्य द्योतकः अपि अस्ति।बंगालप्रदेशे प्राचीनकालात् एव बौद्धिकचिन्तनस्य, सांस्कृतिकचेतनायाः, सामाजिक-आन्दोलनानां च विशेषः प्रभावः आसीत्। वामपन्थदलानि चतुस्त्रिंशद्वर्षपर्यन्तं राज्यं शासितवन्तः। ततः 2011 तमे वर्षे ममताबनर्जीमहोदयायाः नेतृत्वे तृणमूलकाङ्ग्रेसदलं सत्तां प्राप्तवान्। प्रारम्भे जनतायाः तस्मिन् दलविशेषे अत्यधिकः विश्वासः आसीत्, किन्तु कालान्तरे भ्रष्टाचारः, हिंसा, प्रशासनिकदुर्बलता, जीविकोपार्जनसमस्या, उद्योगक्षयः इत्यादयः दोषाः प्रकटिताः अभवन्।

अस्यां परिस्थितौ बीजेपीदलं स्वस्य आधारं निर्मातुम् आरब्धवान्। विशेषतः ग्रामीणक्षेत्रेषु, सीमावर्तीभागेषु, युवकेषु च दलस्य लोकप्रियता वर्धिता।

## बीजेपीदलस्य रणनीतिः

सुदृढसंगठनव्यवस्था-बीजेपीदलस्य प्रमुखशक्तिः तस्य संगठनव्यवस्था आसीत्। दलस्य कार्यकर्तारः ग्रामस्तरात् आरभ्य नगरस्तरपर्यन्तं सक्रियाः आसन्। प्रत्येकमतदातुः सम्पर्कः, प्रचारः, संवादः च व्यवस्थितरूपेण कृतः।

निर्वाचनरणनीतिकौशलम्-अमितशाहमहोदयस्य रणनीतिः विजयस्य प्रमुखकारणेषु अन्यतमा आसीत्। तेन सूक्ष्मस्तरेण निर्वाचनव्यवस्था नियोजिता। क्षेत्रविशेषानुसारं प्रचारः, जातीयसमीकरणम्, धार्मिकभावनानां समुचितप्रयोगः, स्थानीयविषयाणां प्रस्तुतीकरणं च कुशलतया कृतम्।

प्रधानमन्त्रीमोदिनः प्रभावः-नरेन्द्रमोदीमहोदयस्य व्यक्तित्वं सम्पूर्णदेशे लोकप्रियम् अस्ति। बंगालराज्ये अपि तस्य सभासु विशालजनसमूहः समागच्छति स्म। विकासः, राष्ट्रवादः, सुरक्षा, आत्मनिर्भरभारतस्य संदेशः च जनमानसे प्रभावं कृतवान्।



## जनसमर्थनस्य कारणानि

परिवर्तनस्य आकाङ्क्षा-दीर्घकालीनशासनस्य परिणामस्वरूपं जनतायां परिवर्तनस्य भावना जागृता। विशेषतः युवावर्गः नवीनराजनीतिम् इच्छति स्म। जीविकोपार्जनाभावः, उद्योगाभावः, शिक्षायाः निम्नस्तरः इत्यादीनां कारणैः जनाः असन्तुष्टाः आसन्।

भ्रष्टाचारविरोधः-तृणमूलकाङ्ग्रेसशासने अनेकभ्रष्टाचारप्रकरणानि प्रकाशे आगतानि। शिक्षकनियुक्तिघोटाला, आर्थिकअनियमितता, स्थानीयहिंसा च जनानां विश्वासः न्यूनः कृतः। बीजेपीदलम् एतान् विषयान् प्रमुखतया प्रचारितवान्।

सीमासुरक्षाविषयः-बांग्लादेशसीमायाः समीपे स्थितेषु क्षेत्रेषु अवैधप्रवेशस्य विषयः अत्यन्तं चर्चितः अभवत्। बीजेपीदलम् अस्य विषयस्य आधारेण राष्ट्रसुरक्षायाः प्रश्नं जनसमक्षे स्थापितवान्। एतेन हिन्दूमतदातॄणां समर्थनं प्राप्तम्। हिन्दूसांस्कृतिकचेतना-बीजेपीदलम् बंगालराज्यस्य सांस्कृतिकपरम्परां हिन्दूचेतनया सम्बद्धेति प्रदर्शितवान्। स्वामी विवेकानन्दः , रवीन्द्रनाथ टैगोर, सुभाषचन्द्र बोसः, श्यामा प्रसाद मुखर्जी, राजा राममोहन राय, ईश्वरचन्द्र विद्यासागर,बंकिमचन्द्र चटर्जी इत्यादीनां महापुरुषाणां आदर्शान् प्रचारयन् दलं सांस्कृतिकराष्ट्रवादस्य वातावरणं निर्मितवान्।

घोषणापत्रस्य प्रभावः-बीजेपीदलस्य “संकल्पपत्रम्” जनानां मध्ये अत्यन्तं चर्चितम् आसीत्। तस्मिन् महिलानां कृते विशिष्टा आर्थिकसहायता, युवकेभ्यः जीविकोपार्जन व्यवस्था, कृषकेभ्यः उत्पादनस्य अधिकमूल्यं, कर्मचारिणां वेतनवृद्धिः, सीमासुरक्षा, समाननागरिकसंहिता इत्यादयः वचनानि दत्तानि। एतेन विभिन्नवर्गाणां समर्थनं दलस्य पक्षे अभवत्।

सामाजिकमाध्यमानां भूमिका-आधुनिकयुगे सामाजिकमाध्यमानि राजनीतौ अत्यन्तं प्रभावशालीनि सन्ति। फेसबुक, यूट्यूब, व्हाट्सएप्, एक्स् (ट्विटर) इत्यादिमाध्यमैः बीजेपीदलम् व्यापकप्रचारं कृतवान्। युवावर्गः डिजिटलमाध्यमेन शीघ्रं प्रभावितः अभवत्। दलस्य प्रचारवीडियो, भाषणानि, लघुसन्देशाः च जनमानसं प्रभावितवन्तः।

## विपक्षस्य दुर्बलता

वामदलकाङ्ग्रेसयोः पतनम्-पूर्वं बंगालराजनीतौ वामदलानां महत्त्वपूर्णं स्थानम् आसीत्। किन्तु २०२६-निर्वाचने तयोः प्रभावः अत्यल्पः अभवत्। अनेकमतदातारः तृणमूलविरोधार्थं बीजेपीदलस्य समर्थनं कृतवन्तः। तृणमूलदलस्य विरोधभावना-दीर्घकालीनसत्तायाः कारणेन जनतायां विरोधभावना उत्पन्ना। स्थानीयस्तरे हिंसा, पक्षपातः, प्रशासनिकदोषाः च जनानां मनसि असन्तोषं जनितवन्तः।

युवाशक्तेः योगदानम्-युवकाः सर्वदा परिवर्तनस्य वाहकाः भवन्ति। बंगालस्य युवा वर्गः जीविकोपार्जनस्य, आधुनिकविकासस्य, उद्योगवृद्धेः च अपेक्षां करोति स्म। बीजेपीदलम् “विकसितभारत” इति भावनां युवकेषु प्रसारितवान्। एतेन युवा मतदातारः दलस्य समर्थनं कृतवन्तः।

महिलासुरक्षा, आर्थिकसहायता, उज्ज्वलायोजना, आवासनिर्माणयोजना इत्यादिभिः केन्द्रसरकारस्य योजनाः बंगालमहिलासु लोकप्रियाः अभवन्। महिलामतदात्र्यः अपि विधानसभानिर्वाचने निर्णायकभूमिकायाः निर्वहणं कृतवत्यः।ग्रामीणक्षेत्रेषु बीजेपीदलस्य कार्यकर्तारः निरन्तरं सक्रियाः आसन्।तैः कृषकसमस्याः, मार्गनिर्माणम्, विद्युत्सुविधा, आवासयोजना इत्यादयःविषयाः प्रमुखतया प्रचारिताः। ग्रामीणजनता विकासस्य आशया बीजेपीदलस्य समर्थनं कृतवती।एतस्य विजयस्य एकं कारणं विशेषसघनपुनरीक्षणम् (SIR) अपि अस्ति यतो हि एतस्मात् कारणात् बहूनां मिथ्या(फर्जी)मतदातॄणां नामानि सूचीमध्ये नासन्।

एतस्य विजयस्य राष्ट्रियप्रभावः अपि वयं द्रष्टुं शक्नुमः यतो हि बंगालराज्ये बीजेपीदलस्य विजयः राष्ट्रियराजनीतौ अपि महत्त्वपूर्णः मन्यते। एतेन पूर्वभारतप्रदेशेषु दलस्य प्रभावः अत्यधिकः वर्धितः जातः। विपक्षदलानां कृते एषा पराजयः चिन्तनीयः विषयः अस्ति।

यद्यपि बीजेपीदलस्य विजयः उल्लेखनीयः अस्ति, तथापि अस्याः सफलतायाः समक्षे अनेकाः समस्याः अनेकानि कार्याणि वा सन्ति यथा -बंगालस्य सांस्कृतिकवैशिष्ट्यस्य संरक्षणम्,साम्प्रदायिकसौहार्दस्य रक्षणम्,उद्योगविकासस्य वास्तविकप्रवर्तनम्,

## जीविकोपार्जनसमस्यायाः समाधानम्,

राजनीतिकहिंसाया निवारणम् इत्यादीनि।

यदि बीजेपीदलम् एतेषां विषयाणां सम्यक् प्रकारेण समाधानं करिष्यति तर्हि तस्य विजयः स्थायी भविष्यति।बंगालराज्ये बीजेपीदलस्य विजयः भारतीयराजनीतौ ऐतिहासिकघटना अस्ति। एषो विजयः केवलं निर्वाचनपरिणामो न, अपितु जनमानसस्य परिवर्तनस्य प्रतीकः अस्ति। संगठनशक्तिः, प्रभावीनेतृत्वम्, विकासस्य वचनानि, विपक्षस्य दुर्बलता, जनसमर्थनम् इत्यादयः कारणानि अस्य विजयस्य मूलतत्त्वानि अभवन्। भविष्ये यदि बीजेपीदलं स्ववचनानि पालयिष्यति, विकासमार्गे राज्यं नेष्यति, सामाजिकसौहार्दं च रक्षिष्यति, तर्हि बंगालस्य राजनीतौ नूतनयुगस्य आरम्भः भविष्यति। अन्यथा जनतायाः अपेक्षाभङ्गः पुनः राजनीतिकपरिवर्तनस्य कारणं भवितुमर्हति।

अतः बंगालराज्ये बीजेपीदलस्य विजयः भारतीयलोकतन्त्रस्य गतिशीलतायाः, जनशक्तेः, परिवर्तनभावनायाः च उत्कृष्टं उदाहरणम् अस्ति।

अत्र वयं आशां कुर्मः यत् पश्चिमबंगालप्रदेशः नवीनसर्वकारस्य प्रयासेन भारतदेशस्य एकः विकसितः प्रदेशः भविष्यति। इत्यलम्।

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनी। अद्य प्रथमा वार्ता अतीव दुःखदायिका अस्ति। अमेरिका-देशे वसता एकेन भारतीयेन प्रवेशाज्ञा-पत्रस्य विलम्बात् मृत-मातुः अन्तिम-दर्शनं न प्राप्तम्।

**नन्दिनी-** सत्यम्, वैदेशिक-नियमैः सः बहु क्लिष्टः। एषा वार्ता अस्मासु चिन्तां जनयति। परं पश्य, बेङ्गलूरु-नगरे एका विचित्रा त्रिचक्रिका दृष्टा। तस्यां दूरदर्शनं जवनिकाः च स्थापिताः सन्ति।

**काव्या-** आम्, सामान्य-यानेन अपि सुखसाधनं प्राप्तुं शक्यते इति तेन चालकेन दर्शितम्। इदानीं क्रीडा-जगतः वार्तां शृणु। शिवानी-नामिका एका बाला पित्रा परित्यक्ता आसीत्, तथापि सा वेगाभ्यास-कन्दुक-क्रीडायां विश्व-विक्रमं कृतवती अस्ति।

**नन्दिनी-** तस्याः धैर्यं प्रशंसनीयम्। माता अपि तया सह सर्वदा स्थिता। अन्ते, मध्यप्रदेशस्य एकस्य प्रशिक्षकस्य वार्तां वदामि। तेन पुरातन- द्विचक्रिकाः वैद्युतिकयानेषु परिवर्तिताः सन्ति।

**काव्या-** एतत् उत्तमं कार्यम्। तेन प्रशिक्षकेन पर्यावरण- रक्षणाय महान् यत्नः कृतः। प्राचीन-वस्तूनां नूतन-प्रयोगः अतीव आवश्यकः अस्ति।

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः